# Code No. 5561

*Roll No.* ...........................

*SET : A*

# D. El. Ed. 2nd Year Exam., January – 2022
## (Admn. Year 2019)

## Pedagogy of Sanskrit Language

## संस्कृत भाषा का शिक्षाशास्त्र

## (Course Code : DE-211)

(Only for Re-appear Candidates)

**[ Evening Session ]**

*Time : 2 Hours ]* *[ Max. Marks : 35*

*समय : 2 घण्टे ]* *[ अधिकतम अंक : 35*

*सामान्य निर्देश :*

*(i) कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 8 तथा प्रश्न 6 हैं।*

*(ii) प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*

*(iii) कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*

*(iv) उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*

*(v) उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*

*(vi) परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*

*(vii) कृपया प्रश्नों का उत्तर देने से पूर्व सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है,* ***परीक्षा के उपरान्त इस सम्बन्ध में कोई दावा स्वीकार नहीं किया जायेगा।***

*सामान्य निर्देशाः –*

*(क)* ***सर्वे*** *प्रश्नाः* ***अनिवार्याः*** *सन्ति।*

*(ख) लेखः सुस्पष्टः सुवाच्यः च भवेत्।*

*(ग) प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् देयानि।*

*(घ) प्रश्नानाम् संख्या अवश्यमेव लेखनीया।*

## भाग - क

**1.** अधोलिखितेषु प्रश्नेषु कयोरपि ***द्वयोः*** प्रश्नयोः व्याख्या कार्या –2 × 3 = 6

(क) 1956 तमे वर्षे गठितेन संस्कृतायोगेन संस्कृतभाषायाः संवर्धनाय याः अपि संस्तुतयः प्रदत्ताः तासां संक्षिप्तरूपेण वर्णनं कुरुत।

(ख) काव्यस्य स्वरूपवर्णनं कुर्वन् अस्य शिक्षणस्य महत्त्वम् उद्देश्यञ्च स्पष्टयत।

(ग) अनुवादशिक्षणेन कोऽभिप्रायः। अस्य महत्त्वं प्रतिपादयत।

**2.** व्याकरणशिक्षणस्य सोपानानां व्याख्या कार्या। 3

**अथवा**

छन्दसः परिभाषां लिखन् अस्य भेदानां सोदाहरणं वर्णनं कुरुत।

**3.** शलाकापरीक्षायाः उद्देश्यानां, गुणानां, दोषाणाञ्च व्याख्या कार्या। 3

**अथवा**

शिक्षकमूल्यांकनस्य महत्त्वं प्रतिपादयत।

**4.** व्याख्याकौशलेन कोऽभिप्रायः ? अस्य घटकानां वर्णनं कुरुत। 3

**अथवा**

श्यामपट्टकौशलस्य अभिप्रायं लिखित्वा अस्य घटकानां वर्णनं कुरुत।

**5.** संस्कृतव्याकरणस्य महत्त्वं प्रतिपादयन् अस्य विशेषताः लिखत। 5

**अथवा**

समासस्य परिभाषां लिखन् अस्य भेदानां वर्णनं सोदाहरणं कुरुत।

## भाग - ख

**6.** वस्तुनिष्ठप्रश्नानाम् उत्तराणि देयानि – $15 \times 1 = 15$

(क) 1956 तमे वर्षे गठितस्य संस्कृतायोगस्य प्रथमोऽध्यक्षः आसीत् –

(i) डॉ० सुमतिकुमार चटर्जी

(ii) डॉ० सुनीतिकुमार चटर्जी

(iii) डॉ० अरुणकुमार बनर्जी

(iv) डॉ० विश्वबन्धु शास्त्री

(ख) 'वाक्यं रसात्मकं काव्यम्' काव्यस्य लक्षणमिदं केन प्रदत्तम् ?

(i) मम्मटेन (ii) दण्डिना

(iii) विश्वनाथेन (iv) आनन्दवर्धनेन

(ग) 'गद्यं कवीनां निकषं वदन्ति' पंक्तिरियं कस्मात् सम्बद्धास्ति ?

(i) गद्यात् (ii) पद्यात्

(iii) चम्पूकाव्यात् (iv) कस्मादपि न

(घ) *काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।*

*व्यसनेन तु मूर्खाणाम्, निद्रया कलहेन वा।।*

श्लोकं पठित्वा लिखत – 'धीमतां कालः कथं गच्छति' ?

(i) निद्रया (ii) कलहेन

(iii) काव्यशास्त्रविनोदेन (iv) व्यसनेन

(ङ) संस्कृतभाषायाम् उपसर्गाः सन्तिः –

(i) 24 (ii) 11

(iii) 22 (iv) 21

(च) 'भूतबलिः' इत्यस्मिन् समस्तपदे कः समासः ?

(i) बहुव्रीहिः (ii) तत्पुरुषः

(iii) अव्ययीभावः (iv) द्वन्द्वः

(छ) आदर्शप्रश्नपत्रस्य गुणेषु सम्मिलितोऽस्ति –

(i) प्रश्नपत्रस्य विश्वसनीयता

(ii) प्रश्नपत्रस्य व्यापकता

(iii) प्रश्नपत्रस्य व्यावहारिकता

(iv) उपर्युक्ताः सर्वे

(ज) आदर्शप्रश्नपत्रस्य रूपरेखायां सम्मिलितोऽस्ति –

(i) उद्देश्यम् (ii) बोधक्षमता

(iii) ज्ञानम् (iv) उपर्युक्ताः सर्वे

(झ) शास्त्रार्थविधिः सम्बद्धोऽस्ति –

(i) प्राचीनमूल्यांकनविधेः

(ii) वर्तमानमूल्यांकनविधेः

(iii) प्रश्नपत्रनिर्माणविधेः

(iv) कस्मादपि न

(ञ) मूल्यांकननिर्देशाः आवश्यकाः सन्ति –

(i) प्रश्नपत्रनिर्मातृभ्यः (ii) विद्यार्थिभ्यः

(iii) परीक्षकेभ्यः (iv) केभ्योऽपि न

(ट) लिखितपरीक्षातः सम्बद्धाः ***नैव*** सन्ति –

(i) वस्तुप्रश्नाः

(ii) मौखिकप्रश्नाः

(iii) लघूत्तरात्मकप्रश्नाः

(iv) निबन्धात्मकप्रश्नाः

(ठ)




उपर्युक्तं चक्रं केन सम्बद्धमस्ति ?

(i) प्रश्नपत्रनिर्माणेन

(ii) सूक्ष्मशिक्षणचक्रेण

(iii) पाठयोजनया

(iv) केनापि न

(ड) पाठयोजनायाः सोपानमस्ति –

(i) उद्देश्यम्   (ii) पूर्वज्ञानम्

(iii) प्रस्तुतीकरणम्   (iv) उपर्युक्ताः सर्वे

(ढ) कारकस्य केन सह अन्वयो भवति ?

(i) धातुना सह

(ii) प्रातिपदिकेन सह

(iii) उपसर्गेण सह

(iv) क्रियया सह

(ण) पाठयोजनायाः प्रकाराः कति ?

(i) द्वौ (ii) त्रयः

(iii) चत्वारः (iv) पञ्चः